[1]अग्नीभवति । [2]उदकीभवति । अथाभिविधेः कात्स्न्र्यस्य च को विशेषः ? यत्रैकदेशेनापि सर्वा[3] प्रकृति[4]विकार-मापद्यते सोऽभिविधिः, यथाऽस्यां सेनायामुत्पातेन सर्वं शस्त्रमग्निसात्सम्पद्यते, वर्षासु सर्वं लवणमुदकसात्सम्पद्यते इति । कात्स्न्र्यं तु [5]सर्वात्मना [6]द्रव्यस्य विकाररूपापत्तौ भवति ॥

## तदधीनवचने । (५४/२१२५)

अभूततद्भावे इति निवृत्तम्, अर्थान्तरोपादानात् । कृभ्वस्तियोगे सम्पदा च इति वर्तते । तदधीनं तदायत्तं, तत्स्वामिकमित्यर्थः । स्वामि[7]सामान्यम्, ईशितव्यसामान्यं च तदधीनशब्देन [8]निर्दिश्यते । स्वामि-[9]विशेषवाचिनः प्रातिपदिकात् ईशितव्येऽभिधेये सातिः प्रत्ययो भवति कृभ्वस्तिभिः सम्पदा च योगे । राजाधीनं करोति राजसात्करोति । राजसाद्भवति । राजसात्स्यात् । राजसात्सम्पद्यते । ब्राह्मणसात्करोति । ब्राह्मण-साद्भवति । ब्राह्मणसात्स्यात् । ब्राह्मणसात्सम्पद्यते ॥

## देये त्रा च । (५५/२१२६)

तदधीनवचने च इति [10]अनुवर्तते । तस्य विशेषणं देयग्रहणम् । दातव्यं देयम् । तदधीने देये त्रा प्रत्ययो भवति, चकारात् सातिश्च कृभ्वस्तिभिः सम्पदा च योगे । ब्राह्मणेभ्यो देयम् इति यद् [11]विज्ञातम्, तद् यदा तेषां [12]समर्पणेन तदधीनं [13]क्रियते तदा[14]त्रा प्रत्ययः । ब्राह्मणाधीनं [15]देयं करोति ब्राह्मणसा[16]त्करोति । ब्राह्मणत्रा करोति । ब्राह्मणत्रा भवति । ब्राह्मणत्रा स्यात् । [17]ब्राह्मणत्रा सम्पद्यते । देये इति किम् ? राजसाद् भवति [18]राष्ट्रम् ॥

## देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् । (५६/२१२७)

सातिर्निवृत्तः, त्रा प्रत्ययोऽनुवर्तते । देवादिभ्यः प्रातिपदिकेभ्यः [19]द्वितीयासप्तम्यन्तेभ्यः त्रा प्रत्ययो भवति बहुलम् । [20]कृभ्वस्तिभिः इति नात्र सम्बध्यते । [21]सामान्येन विधानम् । देवान् गच्छति देवत्रा गच्छति । देवेषु वसति देवत्रा वसति । मनुष्यान् गच्छति मनुष्यत्रा गच्छति । मनुष्येषु वसति मनुष्यत्रा वसति । [22]एव-मन्येष्वप्युदाहार्यम् । पुरुषान् गच्छति पुरुत्रा गच्छति । मर्त्यान् [23]गच्छति मर्त्यत्रा [24]गच्छति । मर्त्येषु वसति मर्त्यत्रा वसति । [25]बहुलवचनादन्यत्रापि भवति, 'बहुत्रा [26]जीवतो मनः' (पै. सं. १९. ३४. ४) इति ॥

## अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच् । (५७/२१२८)

यत्र ध्वनावकारादयो वर्णा विशेषरूपेण न व्यज्यन्ते सोऽव्यक्तः । तस्यानुकरणमव्यक्तानुकरणम् । [27]द्व्यच् अवरार्धं यस्य तद् द्व्यजवरार्धम् । अवरशब्दो[28]ऽपकर्षे । [29]यस्यापकर्षे क्रियमाणे सुष्ठु न्यूनमर्धं द्व्यचकं सम्पद्यते,

---

1. अग्निर्भवति ह. 2. असम्पदा इत्यधिकम् ह. 3. च इत्यधिकम् फ. 4. विकाररूपं सम्पद्यते फ. ह, सर्वाः प्रकृतयो विकारमापद्यन्ते क. 5. सर्वात्मकस्य क. 6. द्रव्यविकाररूपापत्तौ क, विकारज्ञापकार्थम् ह. 7. सामान्यमिति तस्य सामान्यं च ह. 8. उच्यते क. 9. विशेषवाचिभ्यः प्रातिपदिकेभ्यः क. 10. वर्तते क. ह. 11. प्रतिज्ञानं क. 12. सम्पत्तौ ह. 13. भवति ब. ड. 14. त्रा नास्ति क. ड. ह. 15. देयं नास्ति क. 16. संपद्यते ब. ड. फ. 17. ब्राह्मणसात्सम्पद्यते ड. 18. राज्यम् ड, नास्ति क. 19. द्वितीयार्थेन ब, द्वितीयार्थे सप्तम्यर्थे च ड. 20. कृभ्वस्तियोगः ब. क. 21. सामान्येन नास्ति फ. 22. वाक्यमिदं नास्ति ब. क. ड. फ. 23–24. वसति ब. क. ड. फ. 25. बहुलग्रहणात् फ. 26. जीवति फ, गच्छति क. 27. द्वौ अचौ यत्र इत्यधिकम् ड. 28. प्रभूतार्थे ड. 29. यस्य नास्ति